# सार्वधातुकप्रक्रियाप्रवेशोपायः

# सार्वधातुकप्रक्रियाप्रवेशोपायः

### एतत् सम्यगधीत्य सार्वधातुकप्रत्ययानां सिद्धिः करणीया

**दीक्षितपुष्पा**

भगवता पाणिनिना स्वकीये धातुपाठे १९३० धातवः दशसु गणेषु विभज्योक्ताः। इमे धातवो मया पाणिनीयप्रक्रियानुसारेण स्वकीये '**प्रक्रियानुसारिपाणिनीयो धातुपाठः**' इति ग्रन्थे पुनर्व्यवस्थापिताः। अयं ग्रन्थोऽवश्यमेव पुरस्ताद् भवेदुद्घाटितः। दशसु गणेषु निबद्धो धातुपाठः सार्वधातुकप्रत्ययानां कृत एवास्ति। नास्ति आर्धधातुकप्रत्ययानां किमपि प्रयोजनमनेन गणबद्धधातुपाठेन।

**धातवो द्विविधाः –**

**१. औपदेशिकधातवः –** पाणिनीयधातुपाठे पठिताः १९३० धातवो धातुपाठ उपदिष्टत्वादौपदेशिकाः। एतेषां 'भूवादयो धातवः १.३.१' इत्यनेन भवति धातुसंज्ञा।

**२. आतिदेशिकधातवः –** सन्, क्यच् ,काम्यच्, क्यष्, क्यङ्, क्विप्, णिङ्, ईयङ्, णिच्, यक्, आय, यङ्, एते द्वादश सनादयः प्रत्ययाः सन्ति। एते सनादयोऽन्ते येषां ते सनाद्यन्ताः समुदायाः 'सनाद्यन्ता धातवः ३.१.३२' इत्यनेन सूत्रेण धातुसंज्ञका भवन्ति।

इत्थञ्च धातवोऽनन्ताः। एतेभ्यो धातुभ्योऽष्टाध्याय्यास्तृतीयेऽध्याये प्रत्यया विधीयन्ते।

पाणिनीयधातुपाठे १५३० धातवो दशसु गणेषु विभाजिताः सन्ति। ते च सन्ति –

९९३ धातवो भ्वादिगणे, १४० दिवादिगणे, १५७ तुदादिगणे, ४१० चुरादिगणे, ३५ स्वादिगणे, १२ तनादिगणे, ६१ क्र्यादिगणे, ७३ अदादिगणे, २४ जुहोत्यादिगणे, २५ रुधादिगणे च।

वस्तुतस्तु धातूनां गणविभागोऽयं सार्वधातुकप्रत्ययानां कृते वर्तते। आर्धधातुकप्रत्ययानां कृते नास्त्ययं गणविभागः। आर्धधातुकप्रत्ययानां सिद्धिरपि, गणक्रमेण यत् क्रियते, तदसत्।

## इत्संज्ञाप्रकरणम्

शब्दा द्विविधा भवन्ति। धातुः, प्रातिपदिकञ्च। अष्टाध्याय्यास्तृतीयेऽध्याये धातुभ्यः प्रत्यया विधीयन्ते। चतुर्थे पञ्चमे चाध्याये प्रातिपदिकेभ्यः प्रत्यया विधीयन्ते।

धातवः, प्रत्ययाश्च, यथा विहितास्तथैव न प्रयुज्यन्ते। तत्रानुबन्धा आसञ्जिताः। यथा – डुकृञ् अयं धातुः। वस्तुतोऽत्र 'कृ' अयं धातुः। आदौ 'डु' अन्ते 'ञ्', इमावनुबन्धौ। एवमेव – टुनदि, ञिमिदा, डुपचष् इत्यादिष्वपि आदावन्ते चानुबन्धौ। बाधृ, अञ्चु, शद्लृ, गम्लृ इत्यादिष्वन्तेऽनुबन्धाः। प्रत्ययेष्वप्यनुबन्धा आसञ्जिताः। यथा ण्वुल् इत्यत्रादौ 'ण्' अन्ते 'ल्', इत्यनुबन्धौ। एवमेव ष्वुन्, षाकन्, इत्यादिषु।यथा लोके कदलीफले बहिर्भागस्त्वग्रूपः क्षिप्यते, अन्तर्भागश्च स्वीक्रियते, स एव भुज्यते, तथैवात्र – श्ना इत्ययं प्रत्ययः। अस्य बहिर्भागः 'श्' इति लुप्यते, अन्तर्भागः 'ना' इति शिष्यते, स एव प्रयुज्यते। जानाति, लुनाति, पुनाति, इत्यादिषु।

यथा लोके बदरीफले बहिर्भागः खाद्यते, अन्तर्भागश्च बीजरूपः क्षिप्यते, तथैवात्र - बाधृ, अञ्चु, शद्लृ, गम्लृ इत्यादयो धातवः, तृच्, अप्, यत्, इत्यादयः प्रत्ययाश्च सन्ति। अत्र बहिर्भागः बाध्, अञ्च्, शद्, गम् इति तृ, अ, य, इति स्वीक्रियते, अन्त्यभागोऽनुबन्धरूपो लुप्यते।

यथा लोके आम्रफले बहिर्भागस्त्वग्रूपः क्षिप्यते, अन्तर्भागो बीजरूपोऽपि क्षिप्यते, मध्यभागो रस एव भुज्यते तथैवात्रापि कुत्रचिद् धातुषु, प्रत्ययेषु चोभयत्रानुबन्धा आसञ्जिताः सन्ति। यथा -

डुकृञ् अयं धातुः। अत्र वस्तुतः 'कृ' इत्येव धातुः। अस्यादौ 'डु' अन्ते 'ञ्', इमावनुबन्धौ। एवमेव - टुनदि इत्यत्रादौ 'टु' इति, अन्ते 'इ' इत्यनुबन्धौ।

एवमेव ञिमिदा, डुपचष् इत्यादिष्वपि आदावन्ते चानुबन्धौ। यथा ण्वुल् इत्यत्रादौ 'ण्' अन्ते 'ल्', इत्यनुबन्धौ। एवमेव ष्वुन्, षाकन्, इत्यादिष्वादौ 'ष्' अन्ते 'न्', इत्यनुबन्धौ।

**धातोः प्रत्यये सति धातौ, प्रत्यये च ये अनुबन्धाः सन्ति, तेषामनुबन्धानाम् इत्संज्ञा करणीया। अत इत्संज्ञाविज्ञानाय इत्संज्ञाप्रकरणमुच्यते-**

**१. उपदेशेऽजनुनासिक इत् (१.३.२)** - धातुप्रातिपदिकनिपातप्रत्याहारसूत्रप्रत्ययादेशागमा उपदेशाः। उपदेशे योऽनुनासिकोऽच् भवति, स इत्संज्ञो भवति।

**धातुष्वनुनासिकस्याच इत्संज्ञा** - गम्लृँ - गम्। वदिँ - वद्। मदीँ - मद्। अञ्चुँ - अञ्च्। गुपूँ - गुप्। बाधृँ - बाध्। कटेँ - कट्। वदिँ - वद्, इत्यादिष्वनुनासिकस्याच इत्संज्ञा भवति। यस्येत्संज्ञा भवति तस्य लोपो भवति 'तस्य लोपः' इत्यनेन सूत्रेण।

**प्रत्ययेष्वनुनासिकस्याच इत्संज्ञा** -सुँ - स्। इनिँ - इन्। ङसिँ - अस्। ड्मतुँप् - मत्। ईयसुँन् - ईयस्। कृत्वसुँच् - कृत्वस्।

**आगमेष्वनुनासिकस्याच इत्संज्ञा** - नुँम् - न्। सुँट् - स्। नुँट् - न्। कुँक् - क्।

**आदेशेष्वनुनासिकस्याच इत्संज्ञा** - अनँङ् - अन्।

एवमेव सर्वत्रोपदेशेऽनुनासिकस्याच इत्संज्ञा विधेया। इत्संज्ञानन्तरं तस्य लोपश्च।

२.**हलन्त्यम्**(१.३.३) - उपदेशेऽन्त्यो हलित्संज्ञको भवति। 'डुपचष्' इत्यत्र 'ष्', 'शप्' इत्यत्र 'प्', 'श्नम्' इत्यत्र 'म्' 'णिच्' इत्यत्र 'च्' इत्येतेऽन्त्यहलोऽनेन सूत्रेणेत्संज्ञका भवन्ति। इत्संज्ञानन्तरं तस्य लोपश्च।

**इर इत्संज्ञा वाच्या (वार्तिकम्)** - 'भिदिँर्' - भिद्। 'छिदिँर्' - छिद्। ईँशुचिर् - शुच्।

**३. न विभक्तौ तुस्माः (१.३.४)** - धातुभ्यो लकारस्य स्थाने विधीयमानाः - तिप् तस् झि। सिप् थस् थ । मिप् वस् मस् । त आताम् झ। थास् आथाम् ध्वम्। इड् वहि महिङ्। इत्येते अष्टादश 'तिङ्प्रत्ययाः' **'विभक्तिश्च १.४.१०४'** इत्यनेन सूत्रेण विभक्तिसंज्ञकाः भवन्ति।

**प्रातिपदिकेभ्यो विधीयमानाः** - सुँ औ जस्। अम् औट् शस् । टा भ्याम् भिस् । ङे भ्या म्

भ्यस्। ङसिँ भ्याम् भ्यस्। ङस् ओस् आम्। ङि ओस् सुप् । इत्येते एकविंशतिः 'सुप्प्रत्ययाः' '**विभक्तिश्च** १.४.१०४' इत्यनेन सूत्रेण विभक्तिसंज्ञकाः भवन्ति।

विभक्तिस्थाः तवर्गसकारमकारा इतो न भवन्ति। अतो विभक्तिस्थानां तवर्गसकारमकाराणामित्सञ्ज्ञा न जायते। जस्, अम्, शस्, भ्याम्, भिस्, भ्यस्, ङस्, ओस्, आम्, तस्, थस्, वस्, मस्, आताम्, थास्, आथाम्, ध्वम्, अत्र विभक्तिस्थयोः सकारमकारयोरित्संज्ञा हलन्त्यमित्यनेन सूत्रेण प्राप्ता निषिध्यते।

४. **आदिर्ञिटुडवः (पा० सू० १.३.५)** – उपदेशे धातोराद्या ञिटुडवः इतो भवन्ति। ञि - ञिमिदाँ, ञिधृषाँ, इत्यादि। टु-टुवेपृँ, टुनदिँ, टुओँश्वि, इत्यादि। डु-डुपचँष्, डुवपँ, इत्यादि।

५. **षः प्रत्ययस्य (पा० सू० १.३.६)** – प्रत्ययस्यादिः षकार इत्संज्ञो भवति। षाकन् - आक। ष्वुन् - वु। ष्वुञ् - वु। इदं सूत्रं प्रत्ययेष्वेव प्रवर्तते, न धातुषु।

६. **चुटू (पा० सू० १.३.७)** – प्रत्ययस्यादी चवर्गटवर्गौ इतौ भवतः। 'जस्' - अस्। 'टा' - आ। ण्वुल् - वु।

७. **लशक्वतद्धिते (पा० सू० १.३.८)** –तद्धितवर्जितस्य प्रत्ययस्यादितो वर्तमाना ल्-श्-कवर्गाः (क्, ख्, ग्, घ्, ङ्) इत्संज्ञा भवन्ति। यथा - शप् - अ। श्यन् - य। श्ना - ना। शानच् - आन। क्त - त। ख्युन् - यु। ग्स्नु - स्नु। घञ् - अ। ङस् - अस्। ल्युट् - यु।

८. **तस्य लोपः (१.३.९)** – यस्येत्संज्ञा, तस्य लोपो भवति। एतैः सूत्रैः धातुपाठे पठितधातूनामित्संज्ञां विधाय तेषां निरनुबन्धानि रूपाणि प्रक्रियानुसारिपाणिनीयधातुपाठस्य तृतीयस्तम्भे लिखितानि। अत्रेदं ध्येयम् -

यत्राकारस्येत्संज्ञा भवति, ते धातव आदितः, यथा - ञिमिदा, ञिष्विदा।

यत्र इकारस्येत्संज्ञा, ते इदितः, यथा - वदि, मदि।

यत्र ईकारस्येत्संज्ञा, ते ईदितः, यथा- मदी, नृती ।

यत्र उकारस्य, ते उदितः, ध्वंसु, अञ्चु। यत्र ऊकारस्य, ते ऊदितः, यथा - गुपू, अक्षू।

यत्र ऋकारस्य, ते ऋदितः, यथा - गाधृ, बाधृ।

यत्र एकारस्य, ते एदितः, कटे, रगे।

यत्र ओकारस्य, ते ओदितः, यथा - टुओश्वि, टुओस्फूर्जा।

यत्र ङकारस्य, ते ङितः, यथा - शीङ्, डीङ्।

यत्र ञकारस्य, ते ञितः, यथा - भृञ्, हृञ्।

यत्र षकारस्य, ते षितः, यथा - डुपचष्, जॄष्, झॄष्।

यत्र 'टु' इत्यस्य, ते ट्वितः - यथा - टुओश्वि, टुओस्फूर्जा। यथा - टुओश्वि, टुओस्फूर्जा।

यत्र 'डु' इत्यस्य ते ड्वितः, यथा - डुपचष्, डुवप्।

एवमेव प्रत्यया अपि कितः, ङितः, ञितः, णितः षितः, नितः---। एतैरनुबन्धैरेव शास्त्रप्रवृत्तिर्भवति। अत इमे सावधानतया स्मर्तव्याः।

**धातूनामित्संज्ञानन्तरमेतेषां चतुर्णां कार्याणां विचारो भवेत् -**

## १. सत्वम्

**येषां धातूनामादौ भवेत् षकारः, तत्र सत्वम् - धात्वादेः षः सः (६.१.६४.)** - धातोरादेः षकारस्य स्थाने सकारादेशो भवति। यथा - ष्वद् = स्वद्। ष्णा = स्ना। ष्ठा = स्था।

**सुब्धातुष्ठिवुष्वष्कादीनां सत्वप्रतिषेधो वक्तव्यः** (वार्तिक) **-** ष्वष्क, ष्ठिवु, एतयोर्नामधातूनां च षकारस्य स्थाने सकारादेशो न भवति। ष्वष्कते। ष्ठीवति। षण्ढीयते।

## २. नत्वम्

**येषां धातूनामादौ भवेद् णकारः, तत्र नत्वम् - .णो नः (६.१.६५ )**- धातोरादेर्णकारस्य स्थाने नकारादेशो भवति। यथा - णट = नट्। णम् - नम्।

## ३. नुमागमः

येषां धातूनां भवेद् इकारस्य इत्संज्ञा, तत्र नुमागमः -

**इदितो नुम् धातोः (७.१.५८)** - इदितो धातोर्नुमागमो भवति। यथा - वदि - वद् - वन्द्। - नश्चापदान्तस्य झलि इति नकारस्यानुस्वारे - वंद् - अनुस्वारस्य ययि परसवर्ण इति परसवर्णे - वन्द्। एवमेव - लाछि - लाछ् - लान्छ् - लांछ् - लाञ्छ्। कपि - कप् - कन्प् - कंप् - कम्प्। लबि - लब् - लन्ब् - लंब् - लम्ब्।

## ४. उपधादीर्घः

**उपधायां च (८.२.७८)** - येषां धातूनामुपधायां भवेतां रेफवकारौ हल्परौ, ताभ्यां प्राग् वर्तमानस्येको दीर्घः। यथा - कुर्द् - कूर्द् / खुर्द् - खूर्द् / गुर्द् - गूर्द्।

इत्संज्ञानन्तरं येषां धातूनां प्राप्यत एषां मध्ये किमपि, तत् तु करणीयमेव। अनन्तरं क्रियेत धातुभ्यः प्रत्ययविधानम्। **इत्थञ्च धातुष्वादौ -**

| | |
|---|---|
| १. उपदेशेऽजनुनासिक इत् | ३. आदिर्ञिटुडवः |
| २. हलन्त्यम् | ४. तस्य लोपः |

एतैरनुबन्धकार्यं विधेयम्। अनन्तरमेतैः यथाप्राप्तम् -

| | |
|---|---|
| १. णो नः | ३. इदितो नुम् धातोः |
| २. धात्वादेः षः सः | ४. उपधायां च |

**प्रत्ययेषु इत्संज्ञानन्तरम्-**

१. **युवोरनाकौ** (७.१.१.) – अनुबन्धकार्यानन्तरमवशिष्टस्य 'यु' इत्यस्य स्थाने 'अन', अथ च 'वु' इत्यस्य स्थाने 'अक' इत्येतावादेशौ भवतः। यथा – ल्युट् – यु – अन। युच् – यु – अन। ण्वुल् – वु – अक। वुञ् – वु – अक। ष्वुन् – वु – अक।

२. **वेरपृक्तस्य** (६.१.६७) – अपृक्तस्य वेर्लोपोभवति। क्विप्, क्विन्, विच्, इत्यादिषु प्रत्ययेषु इत्संज्ञानन्तरं 'व्' इति शिष्यते, अपृक्तः। यत्र एक एव अल् शिष्यते, स प्रत्ययोऽपृक्तसंज्ञकः। तस्यानेन लोपो विधीयते। इत्थञ्च एषाम्, एतादृशानां च प्रत्ययानां सर्वापहारी लोपो भवति।

अष्टाध्याय्यां सप्तमाध्याये प्रथमे पादे (७.१.१-४९) वर्तन्ते प्रत्ययादेशाः। अत्र विहितप्रत्ययानां स्थाने आदेशा विधीयन्ते। ते तत्र विशेषेण द्रष्टव्याः।

---

# इदानीं सार्वधातुकतिङ्कृत्प्रक्रियोच्यते

**यस्मात् प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्** (१.४.१३) – यस्मात्प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद्वा तदादिशब्दस्वरूपं प्रत्यये परतोऽङ्गसंज्ञं भवति। यथा – चुर्+णिच्+शप्+तिप्। अत्र णिच्प्रत्ययस्याङ्गमस्ति णिच्प्रत्ययात् पूर्वं विद्यमानं 'चुर्' इति। शप्प्रत्ययस्याङ्गमस्ति शप्प्रत्ययात् पूर्वं विद्यमानं 'चुर्+णिच्' इति। तिप्प्रत्ययस्यास्याङ्गमस्ति तिप्प्रत्ययात् पूर्वं विद्यमानं 'चुर्+णिच्+शप्' इति।

धातोः प्रत्यये सति प्रत्ययनिमित्तेन यत्कार्यं भवति, तदङ्गकार्यमित्युच्यते। वर्णनिमित्तेन यत्कार्यं भवति, तत् सन्धिकार्यं भवति। प्रत्ययनिमित्तकमङ्गकार्यमादौ विधेयम्, अन्ते सन्धिः।

**इदानीं प्रक्रियाक्रम उच्यते।**

१. आदौ धातुसंज्ञा।

२. ततः प्रत्ययविधानम्।

३. धातोः प्रत्ययस्य चानुबन्धानामित्संज्ञां विधाय तेषां लोपः।

४. इत्संज्ञानन्तरं सत्वनत्वानुमागमोपधादीर्घादीनां चतुर्णां कार्याणां विचारः।

४. प्रत्ययस्य स्वरूपविचारः, सार्वधातुसंज्ञकः, उताहो आर्धधातुकसंज्ञकः।

५. यदि सार्वधातुकसंज्ञकः तदा धातोः गणविचारः, गणानुसारेण धातुप्रत्यययोर्मध्ये विकरणम्। यस्य गणस्य नोक्तं किञ्चिद् विकरणं तत्र शबिति। सनाद्यन्तेभ्योऽपि शबेव।

६. प्रत्ययस्यातिदेशविचारः।

७. अङ्गकार्यम्।

८. सन्धिः।

## सार्वधातुके प्रत्यये पञ्चोपाङ्गानि

अङ्गकार्यात् प्राक् प्रत्ययादेशः, विकरणं, धात्वादेशः, अतिदेशः, द्वित्वाभ्यासकार्यम्, इत्येतेषां पञ्चोपाङ्गानां विचार आवश्यको भवति। एतेषामुपाङ्गानां कृत् अष्टाध्याय्यां पृथक् पृथक् प्रकरणानि कृतानि सन्ति। तानि च सन्ति -

१. **प्रत्ययादेशः** - ३.४.७७ इत्यतः३.४.११२। ७.१.१ इत्यतः७.१.४९ इत्यन्तम्। अथ च ७.३.५० इत्यतः७.३.५१ इत्यन्तम्।

२. **विकरणम्** - ३.१.६८ इत्यतः ३.१.९० इत्यन्तम्।

३. **धात्वादेशः** - २.४.३५ इत्यतः २.४.५७ इत्यन्तम्। ६.४.४५ इत्यतः ६.४.५७ इत्यन्तम्। अथ च ७.३.७१ इत्यतः७.३.८१ इत्यन्तम्।

४. **अतिदेशः** - १.२.१ इत्यतः१.२.२६ इत्यन्तम्।

५. **द्वित्वाभ्यासकार्यम्** - तत्राष्टाध्याय्यां द्वित्वम् - ६.१.१ इत्यतः ६.१.१२ इत्यन्तं वर्तते। अभ्यासकार्यम् - ७.४.५९ इत्यतः ७.४.९७ इत्यन्तं वर्तते। ६.१.१७। ६.४.७८। ८.४.५४ इत्यत्र च।

---

## सार्वधातुकलकाराः

अष्टाध्याय्यास्तृतीयेऽध्याये धातुभ्यो विहिता दश लकारप्रत्ययाः सन्ति। ते च प्राच्यग्रन्थेष्वकारादि-क्रमेणोच्यन्ते - लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्, इति। वस्तुतोऽयं क्रमस्तु अकारादिक्रमोऽस्ति, न च प्रक्रियाक्रमः। अष्टाध्याय्यामपि नानेन क्रमेणैषां विधानं नास्ति, न च प्रक्रिया-साधनम्। **अतः प्रक्रियायामयं क्रमः सर्वथा नानुसरणीयः।** अत्र लिङ् लकारो द्विविधो भवति, विधिलिङ्-आशीर्लिङ्भेदेन।

एषां दशलकाराणां स्थाने ये तिङ्प्रत्यया भवन्ति, तेषां मध्ये लट्, लोट्, लङ्, विधिलिङ्, इत्येतेषां चतुर्णां लकाराणां तिङ्प्रत्यया एव सार्वधातुकसंज्ञका भवन्ति, येऽनुपदमेव वक्ष्यन्ते। अन्ये लिट्, लुट्, लृट्, आशीर्लिङ्, लुङ्, लृङ्, इत्येतेषां षड्लकाराणां प्रत्यया आर्धधातुकसंज्ञका भवन्ति। ते चार्धधातुकप्रसङ्गे वक्ष्यन्ते।

लेट्लकारो वेद एव प्रयुज्यते। स च द्विविधो भवति - सिप्प्रत्ययाभावे सार्वधातुकसंज्ञकः, सिप्प्रत्यये आर्धधातुकसंज्ञकः। अन्ये लकारा वेदे लोके च प्रयुज्यन्ते।

सार्वधातुकलकाराणामर्था उच्यन्ते -----

१. **वर्तमाने लट् (३.२.१२३)** - प्रारब्धोऽपरिसमाप्तश्च वर्तमानः। तस्मिन् वर्तमानार्थे वर्तमानाद् धातोर्लट् प्रत्ययो भवति। देवदत्तः पठति। पचति। भवति।

२. **अनद्यतने लङ् (३.२.१११)** - न विद्यते अद्यतनं यस्मिन्। अविद्यमानाद्यतने भूतेऽर्थे

वर्तमानाद् धातोर्लङ् प्रत्ययो भवति। ह्यः देवदत्तः अकरोत्। अहरत्। अभवत्।

३. **विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (३.३.१६१)** - विधिः निमन्त्रणम्, आमन्त्रणम्, अधीष्टः, संप्रश्नः, प्रार्थनम्, इत्येतेष्वर्थेषु धातोर्लिङ् प्रत्ययो भवति।

**विधिः प्रेरणम्** - कटं कुर्यात् (चटाई बनाये)। वस्त्रं क्षालयेः = कपड़े धो दो।

**निमन्त्रणं नियोगकरणम्** - इह श्राद्धे भवान् भुञ्जीत। इह भवानासीत।

**आमन्त्रणं कामाचारकरणम्**- इह भवानासीत। इह भवान् भुञ्जीत (=आप यहाँ भोजन करें। करें या न करें, यह आपकी इच्छा।) अत्र कामाचारानुज्ञा वर्तते।

**सत्कारपूर्वको व्यापारोऽधीष्टः** - भवान् माणवकम् अध्यापयेद् (= मेरे बच्चे को आप पढ़ा दीजियेगा।) माणवकं भवानुपनयेत।

**संप्रश्नः सम्प्रधारणम्** - किं नु खलु भो व्याकरणमधीयीय ? (क्या मैं व्याकरणशास्त्र पढ़ूँ ?)

**प्रार्थनं याच्ञा** - भवति मे प्रार्थना, व्याकरणमधीयीय। भवान् मे अन्नं दद्यात्। (आप मुझे अन्न दें।)

४. **लोट् च** (३.३.१६२) - लोट् प्रत्ययो भवति विध्यादिष्वर्थेषु। भवतो मङ्गलं भवतु।

## तिङ्सार्वधातुकप्रत्ययाः

एषां दश लकाराणां स्थाने 'लस्य (३.४.७७)' इत्यधिकृत्य तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ्, (३.४.७८) इत्येते अष्टादश तिङादेशाः विधीयन्ते। अनन्तरमेतेषां तिङामपि स्थाने आदेशा भवन्ति, येन दशलकाराणां प्रत्यया निष्पद्यन्ते।

**लः परस्मैपदम् (पा० सू० १.४.९९)** -

एतेषां अष्टादश तिङ्प्रत्ययानां मध्ये तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, अथ च शतृ इत्येते परस्मैपदसञ्ज्ञका भवन्ति।

**तङानावात्मनेपदम् (पा० सू० १.४.१००)** -

'तङ्' इति प्रत्याहारः, त इत्यत आरभ्य महिङ् इति यावत्। एतेषां अष्टादश तिङ्प्रत्ययानां मध्ये त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ्, अथ च शानच्, कानच्, इत्येते आत्मनेपदसञ्ज्ञका भवन्ति।

**तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः (पा० सू० १.४.१०१)** -

तिङोऽष्टादश प्रत्ययाः। नव परस्मैपदसञ्ज्ञका, नवात्मनेपदसञ्ज्ञकाः। तत्र परस्मैपदेषु त्रयस्त्रिकाः प्रथममध्यमोत्तमसंज्ञा भवन्ति। आत्मनेपदेष्वपि त्रयस्त्रिकाः प्रथममध्यमोत्तमसंज्ञा भवन्ति। तिप्, तस्, झि इति प्रथमः। सिप्, थस्, थ इति मध्यमः। मिप्, वस्, मस् इत्युत्तमः। त, आताम्, झ इति प्रथमः। थास्, आथाम्, ध्वम् इति मध्यमः। इट्, वहि, महिङ् इत्युत्तमः।

**तान्येकवचनद्विवचनबहुवचनान्येकशः (पा.सू. १.४.१०२) -**

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति। यथा - तिबित्येकवचनम्। तसिति द्विवचनम्। झीति बहुवचनम्।

लकाराणां द्वौ विभागौ भवतः-सार्वधातुकलकारा, आर्धधातुकलकाराश्च।

## कृत्सार्वधातुकप्रत्ययाः

**कृदतिङ् (३.१.९१) -** धातोः विहितानां तिङ्भिन्नप्रत्ययानां कृत्संज्ञा भवति।

**कृत्प्रत्यया अपि द्विविधाः -** कृत्प्रत्ययेषु यत्र शकारस्य इत्संज्ञा भवति, तेषां प्रत्ययानां शित्त्वात् **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञा भवति। ते च सन्ति-

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| शतृँ | - | अत् | शानच् | - | आन | शानन् | - | आन |
| चानश् | - | आन | खश् | - | अ | श | - | अ |
| एश् | - | ए | शध्यै | - | अध्यै | शध्यैन् | - | अध्यै |

शिद्भिन्नाः सर्वे कृत्प्रत्यया आर्धधातुकसंज्ञाः सन्ति। **ते चार्धधातुकप्रसङ्गे वक्ष्यन्ते।**

---

# १. प्रथममुपाङ्गम्-प्रत्ययादेशः

**धातुविकरणयोः संयोजनेन निष्पद्यमानमङ्गं पुनर्द्विविधम्।** अदन्तम्, अनदन्तं च।

भ्वादिः, दिवादिः, तुदादिः, चुरादिः इत्येतेषु विकरणसंयोगेन निष्पद्यमानमङ्गम् अदन्तमेव भवति।

| | | | | | | |
|---|---|---|---|---|---|---|
| भू | + | शप् | = | भव | - | इदम् अदन्तमङ्गम्। |
| चुर् | + | णिच् + शप् | = | चोरय | - | इदम् अदन्तमङ्गम्। |
| दिव् | + | श्यन् | = | दीव्य | - | इदम् अदन्तमङ्गम्। |
| तुद् | + | श | = | तुद | - | इदम् अदन्तमङ्गम्। |

## हिप्रत्ययकृते विशेषः

१. यदा अङ्गम् अदन्तं भवति, तदा **'अतो हेः'** इति सूत्रेण हिप्रत्ययस्य लुग्भवति। यथा - भव + हि = भव। गच्छ + हि = गच्छ। पठ + हि = पठ।

२. यदा अङ्गस्यान्ते प्रत्ययस्य असंयोगपूर्व उकारो भवति, तदा **'उतश्च प्रत्ययादसंयोगपूर्वात्'** इति सूत्रेण हिप्रत्ययस्य लोपो भवति। यथा - चिनु + हि = चिनु। तनु + हि = तनु।

३. यदा अङ्गम् अनदन्तं भवति, तदा हिप्रत्ययस्य लोपो न भवति। यथा - शक्नु + हि = शक्नुहि। जानी + हि = जानीहि।

४. यदा अङ्गम् श्नाप्रत्ययान्तं भवति, श्नाप्रत्ययात् च पूर्वं हल् भवति तदा **'हलः श्नः शानज्झौ'** इति सूत्रेण श्नाप्रत्ययस्य स्थाने शानच्=आन आदेशो भवति, हिप्रत्ययस्य च लोपो भवति। यथा - बध्ना + हि = बधान। मुष्णा + हि = मुषाण। ग्रथ्ना + हि = ग्रथान।

५. हुधातोः परस्य, झलन्तधातोः च परस्य, हुप्रत्ययस्य स्थाने **'हुझल्भ्यो हेर्धिः'** इति सूत्रेण धि इत्यादेशो भवति। जुहु + हि = जुहुधि। रुन्ध् + हि = रुन्द्धि।

## १. अदन्तस्याङ्गस्य कृते चतुर्णां लकाराणां सार्वधातुकप्रत्ययाः

## (प्रथमगणसमूहः)

**(भ्वादिः, दिवादिः, तुदादिः, चुरादिः)**

**अत्रेदमवधेयम् -** पाणिनीयधातुपाठस्य धातवो दशसु गणेषु विभक्ताः सन्ति। तत्र भ्वादिः, दिवादिः, तुदादिः, चुरादिः एतेषां चतुर्णां गणानां धातवो यदा स्वस्वविकरणैः संयुज्यन्ते, तदैषामन्ते ह्रस्वाकारो भवति। अत इमान्यङ्गान्यदन्तानि निष्पद्यन्ते। यथा -

| | | | | | | |
|---|---|---|---|---|---|---|
| भू | + | शप् | = | भव | - | इदम् अदन्तमङ्गम्। |
| चुर् | + | णिच् + शप् | = | चोरय | - | इदम् अदन्तमङ्गम्। |
| दिव् | + | श्यन् | = | दीव्य | - | इदम् अदन्तमङ्गम्। |
| तुद् | + | श | = | तुद | - | इदम् अदन्तमङ्गम्। |

यदाङ्गं भवत्यदन्तं, तदा प्रथमगणसूमहस्य इमे प्रत्ययाः प्रयुज्यन्ते।

**लट्लकारः**

| | परस्मैपदम् | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र. पु. | ति | तः | अन्ति | ते | इते | अन्ते |
| म. पु. | सि | थः | थ | से | इथे | ध्वे |
| उ. पु. | मि | वः | मः | .ए | वहे | महे |

**लोट्लकारः**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | तु, तात् | ताम् | अन्तु | ताम् | इताम् | अन्ताम् |
| म. पु. | ०, तात् | तम् | त | स्व | इथाम् | ध्वम् |
| **उ. पु.** | आनि | आव | आम | ऐ | आवहै | आमहै |

**लङ्लकारः**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | त् | ताम् | अन् | त | इताम् | अन्त |
| म. पु. | स् (:) | तम् | त | थाः | इथाम् | ध्वम् |
| उ. पु. | अम् | व | म | इ | वहि | महि |

**विधिलिङ् लकारः**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र.पु. | इत् | इताम् | इयुः | ईत | ईयाताम् | ईरन् |
| म.पु. | इः | इतम् | इत | ईथाः | ईयाथाम् | ईध्वम् |
| उ.पु. | इयम् | इव | इम | ईय | ईवहि | ईमहि |

## २. अनदन्तस्याङ्गस्य कृते चतुर्णां लकाराणां विशेषप्रत्ययाः (द्वितीयगणसमूहः)

(अदादिः, जुहोत्यादिः, स्वादिः, रुधादिः, तनादिः, क्र्यादिः)

द्वितीयगणसमूहस्य (अदादिः, जुहोत्यादिः, स्वादिः, रुधादिः, तनादिः, क्र्यादिः) धातवो यदा संयुज्यन्ते स्वस्वविकरणैः, तदैषामन्ते ह्रस्वाकारो नैव भवति। अत इमान्यङ्गान्यनदन्तानि निष्पद्यन्ते। यथा-

| | | | | | | |
|---|---|---|---|---|---|---|
| चि | + | श्नु | = | चिनु | - | इदम् अनदन्तमङ्गम्। |
| क्री | + | श्ना | = | क्रीणा | - | इदम् अनदन्तमङ्गम्। |
| तन् | + | उ | = | तनु | - | इदम् अनदन्तमङ्गम्। |
| हु | + | शप्-श्लु | = | जुहु | - | इदम् अनदन्तमङ्गम्। |
| वा | + | शप्-लुक् | = | वा | - | इदम् अनदन्तमङ्गम्। |
| रुध् | + | श्नम् | = | रुणध् | - | इदम् अनदन्तमङ्गम्। |

यदाङ्गं भवत्यनदन्तं, तदा द्वितीयगणसमूहस्य इमे प्रत्ययाः प्रयुज्यन्ते।

द्वितीयगणसमूहस्य 'अनदन्तानाम्' अङ्गानां कृते प्रत्यया इमे सन्ति ---

**लट्लकारः**

| | परस्मैपदम् | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र. पु. | *ति* | तः | अन्ति | ते | आते | अते |
| म. पु. | *सि* | थः | थ | से | आथे | ध्वे |
| उ. पु. | *मि* | वः | मः | ए | वहे | महे |

लोट्लकार:

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *तु*, तात् | ताम् | अन्तु | ताम् | आताम् | अताम् |
| म. पु. | हि, तात् | तम् | त | स्व | आथाम् | ध्वम् |
| उ. पु | *आनि* | *आव* | *आम* | *ऐ* | *आवहै* | *आमहै* |

लङ्लकार:

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *त्* | ताम् | अन् | त | आताम् | अत |
| म. पु. | *स् (:)* | तम् | त | था: | आथाम् | ध्वम् |
| उ. पु. | *अम्* | व | म | इ | वहि | महि |

विधिलिङ्लकार:

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | यात् | याताम् | यु: | ईत | ईयाताम् | ईरन् |
| म. पु. | या: | यातम् | यात | ईथा: | ईयाथाम् | ईध्वम् |
| उ. पु. | याम् | याव | याम | ईय | ईवहि | ईमहि |

## ३. अभ्यस्तानाम् अङ्गानां कृते त्रय: प्रत्यया भिन्ना भवन्ति

अभ्यस्तसंज्ञोच्यते-

**उभे अभ्यस्तम् (६.१.५)** – यदा धातो: द्वित्वं भवति, तदा उभयो: अभ्यस्तसंज्ञा भवति। यथा - भिद् - भिद् भिद् - बेभिद्। गा - गा गा - जागा। मुद् - मुद् मुद् - मोमुद्। पठ् - पठ् पठ् - पापठ्।

**जक्षित्यादय: षट् (६.१.६)** – जक्ष्, शास्, चकास्, जागृ, दरिद्रा, दीधी, वेवी, इत्येतेषां धातूनां द्वित्वं विनैव अभ्यस्तसंज्ञा भवति। यदा अङ्गम् अभ्यस्तं भवति, तदा इमे त्रय: प्रत्यया: परिवर्तन्ते –

**लट्लकारे 'अन्ति' इत्यस्य स्थाने 'अति' इति प्रत्ययो भवति। लोट्लकारे 'अन्तु' इत्यस्य स्थाने 'अतु' इति प्रत्ययो भवति। लङ्लकारे 'अन्' इत्यस्य स्थाने 'उ:' इति प्रत्ययो भवति।**तत्र सूत्राणि-

**अदभ्यस्तात् (७.१.४)** – लट्लकारे 'अन्ति' इत्यस्य स्थाने 'अति' इति प्रत्ययो भवति। लोट्लकारे 'अन्तु' इत्यस्य स्थाने 'अतु' इति प्रत्ययो भवति।

**सिजभ्यस्तविदिभ्यश्च (३.४.१०९)**– लङ्लकारे 'अन्' इत्यस्य स्थाने 'उ:' इति प्रत्ययो भवति।

## ४. यङ्लुगन्तधातूनां कृते प्रत्यया:

**यङो वा (७.३.९४)** – सर्वे यङ्लुगन्तधातव: अभ्यस्तसंज्ञका: सन्ति। यङ्लुगन्तधातो: परस्य

हलादिपित: सार्वधातुकप्रत्ययस्य वा 'ईट्' आगमो भवति। **यङ्लुगन्तधातो: आत्मनेपदं न भवति।**

| | **लट्लकार: परस्मैपदम्** | | | **लोट्लकार: परस्मैपदम्** | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र. पु. | *ति/ईति* | त: | अति | *तु/ईतु/*तात् | ताम् | अतु |
| म. पु. | *सि/ईषि* | थ: | थ | हि, तात् | तम् | त |
| उ. पु. | *मि/ईमि* | व: | म: | *आनि* | *आव* | *आम* |

| | **लङ्लकार: परस्मैपदम्** | | | **विधिलिङ्लकार: परस्मैपदम्** | | |
|---|---|---|---|---|---|---|
| प्र. पु. | *त/ईत्* | ताम् | उ: | यात् | याताम् | यु: |
| म. पु. | *स (:)/ई:* | तम् | त | या: | यातम् | यात |
| उ. पु. | *अम्* | व | म | याम् | याव | याम |

## ५. रुद् अन् स्वप् श्वस् जक्ष् एषां पञ्चानां कृते विशेषप्रत्यया:

**रुदादिभ्य: सार्वधातुके (७.२.७६)** - रुदादिगणे पञ्च धातव: पठिता:। एभ्य: परस्य वलादे: सार्वधातुकस्येडागमो भवति (त, थ, ध, स, व, म, ह एषाम्)। यथा -

**रुदश्च पञ्चभ्य: (७.३.९८)** -रुदादिभ्य: पञ्चभ्य: परस्य हलादे: सार्वधातुकस्यापृक्तस्य ईडागमो भवति। अरोद् + त् - अरोद् + ई + त् = अरोदीत् / अरोद् + स् = अरोदी:।

**अड् गार्ग्यगालवयो: (७.३.९९)** - रुदादिभ्य: पञ्चभ्य: परस्य हलादे: सार्वधातुकस्यापृक्तस्य वा अडागमो भवति। अरोद् + त् - अरोद् + अ + त् = अरोदत् / अरोद् + स् - अरोद् + अ + स् = अरोद:।

| | **लट्लकार:** | | | **लोट्लकार:** | | |
|---|---|---|---|---|---|---|
| प्र. पु. | ***इति*** | इत: | अन्ति | ***इतु/***इतात् | इताम् | अन्तु |
| म. पु. | ***इषि*** | इथ: | इथ | इहि/इतात् | इतम् | इत |
| उ. पु. | ***इमि*** | इव: | इम: | ***आनि*** | ***आव*** | ***आम*** |

| | **लङ्लकार:** | | | **विधिलिङ्लकार:** | | |
|---|---|---|---|---|---|---|
| प्र. पु. | ***ईत्/अत्*** | इताम् | अन् | यात् | याताम् | यु: |
| म. पु. | ***ई:/अ:*** | इतम् | इत | या: | यातम् | यात |
| उ. पु. | ***अम्*** | इव | इम | याम् | याव | याम |

## ६. तु, रु, स्तु, एषां कृते इमे विशेषप्रत्ययाः विकल्पेन भवन्ति

**तुरुस्तुशम्यमः सार्वधातुके (७.३.९५)** - एषां हलादौ वा ईडागमो भवति।

**लट्लकारः परस्मैपदम्**

| | | | |
|---|---|---|---|
| प्र. पु. | *ति/ईति* | तः/ईतः | अन्ति |
| म. पु. | *सि/ईषि* | थः/ईथः | थ/ईथ |
| उ. पु. | *मि/ईमि* | वः/ईवः | मः/ईमः |

**लोट्लकारः परस्मैपदम्**

| | | | |
|---|---|---|---|
| प्र. पु. | *तु/ईतु*/तात्/ईतात् | ताम्/ईताम् | अन्तु |
| म. पु. | हि/तात्/ईहि/ईतात् | तम्/ईतम् | त/ईत |
| उ. पु | *आनि* | *आव* | *आम* |

**लङ्लकारः परस्मैपदम्**

| | | | |
|---|---|---|---|
| प्र. पु. | *त्/ईत्* | ताम्/ईताम् | अन् |
| म. पु. | *स् (ः)/ईः* | तम्/ईतम् | त/ईत |
| उ. पु. | *अम्* | व/ईव | म/ईम |

**विधिलिङ्लकारः परस्मैपदम्**

| | | | |
|---|---|---|---|
| प्र. पु. | यात्/ईयात् | याताम्/ईयाताम् | युः/ईयुः |
| म. पु. | याः/ईयाः | यातम्/ईयातम् | यात/ईयात |
| उ. पु. | याम्/ईयाम् | याव/ईयाव | याम/ईयाम |

## ७. ब्रू-धातु-कृते विशेषप्रत्ययाः

**ब्रुव ईट् (७.३.९३)** - एतस्मादुत्तरस्य हलादेः पितः सार्वधातुकस्य ईडागमो भवति। ब्रू + ई + ति - सार्वधातुकार्धधातुकयोः इति गुणे - ब्रो + ई + ति - एचोऽयवायावः इति अवादेशे - ब्रव् + ई + ति = ब्रवीति। एवमेव - ब्रवीषि, ब्रवीमि, अब्रवीत्, अब्रवीः, ब्रवीतु।

**ब्रुवः पञ्चानामादित आहो ब्रुवः (३.४.८४)** - ब्रुवः परस्य लटः परस्मैपदानां पञ्चानाम् आदिभूतानां पञ्चैव णल्, अतुस्, उस्, थल्, अथुस् इत्येते आदेशा भवन्ति। तत्संनियोगेन च ब्रुवः स्थाने आहशब्द आदेशो भवति। ब्रू + ति - आह् + णल् = आह। एवमेव - ब्रू + अतुः - आहतुः। ब्रू + उः - आहुः। ब्रू + अथुः - आहथुः। ब्रू + सि - आह् + थ - आत्थ।

**आहस्थः (८.२.३५)** - आहो हकारस्य थकारादेशो भवति झलि परतः। आह् + थ - आथ् + थ / खरि च इति चर्त्वे - आत्थ।

**लट्लकारः परस्मैपदम्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | ***ईति/णल्*** | तः/अतुः | अन्ति/उः |
| म. पु. | ***ईषि/थल्*** | थः/अथु | थ |
| उ. पु. | ***ईमि*** | वः | मः |

**लोट्लकारः परस्मैपदम्**

| | | | |
|---|---|---|---|
| प्र. पु. | ***ईतु***/तात् | ताम् | अन्तु |
| म. पु. | हि, तात् | तम् | त |
| उ. पु | ***आनि*** | ***आव*** | ***आम*** |

**लङ्लकारः परस्मैपदम्**

| | | | |
|---|---|---|---|
| प्र. पु. | ***ईत्*** | ताम् | अन् |
| म. पु. | ***ईः*** | तम् | त |
| उ. पु. | ***अम्*** | व | म |

अन्ये प्रत्यया न परिवर्तन्ते।

## ८. शीङ्-धातु-कृते त्रयो विशेषप्रत्ययाः

**शीङो रुट्** (७.१.६) - शीङ्धातोरुत्तरस्य झस्य रुडागमो भवति। तेन एवं प्रत्यया निष्पद्यन्ते - लट्- अते-अस्य स्थाने-रते - शेरते। लोट् - अताम्-अस्य स्थाने-रताम् - शेरताम्। लङ् - अत-अस्य स्थाने-रत - अशेरत। अन्ये प्रत्यया न परिवर्तन्ते।

## ९. विद्-धातु-कृते विशेषप्रत्ययाः

**विद्-धातोः त्रयाणां प्रत्ययानां वा रुडागमो भवति आत्मनेपदे -**

**वेत्तेर्विभाषा** (७.१.७) -विदधातोः आत्मनेपदे इमे प्रत्यया वा भवन्ति - लट् - रते - संविद्रते। लोट् - रताम् - संविद्रताम्। लङ् - रत - समविद्रत।

**विदो लटो वा** (३.४.८३) - विदधातोः परस्मैपदे इमे प्रत्यया वा भवन्ति - णल्, अतुः, उः, थल्, अथुः, अ, णल्, व, म। वेद विदतुः विदुः। वेत्थ विदथुः विद। वेद विद्व विद्म।

**सिजभ्यस्तविदिभ्यश्च** (३.४.१०९)- सिचः परस्य, अभ्यस्तसंज्ञकेभ्यो वेत्तेश्चोत्तरस्य झेर्जुसादेशो भवति। अत एभ्यो लङि प्रथमपुरुषबहुवचने परस्मैपदे 'जुस् - उः' इति प्रत्ययो भवति। अविद् + झि - अविद् + उः = अविदुः। अन्ये प्रत्यया न परिवर्तन्ते।

**धातोर्विहिता प्रत्ययाः**

- दशलकाराणां प्रत्ययाः तिङः
  - सार्वधातुकम् — लट्, लोट्, लङ्, विधिलिङ्, इत्येतेषां चतुर्णां लकाराणां प्रत्ययाः
    - पितः — ति, सि, मि, त्, स्, अम् तु, आनि, आव, आम, ऐ, आवहै, आमहै विकरणेषु एकः शप् = १४
    - अपितः — चतुर्णां लकाराणां पिद्भिन्नाः ६४ प्रत्ययाः
  - आर्धधातुकम् — लिट्, लुट् लट्, आशीर्लिङ्, लुङ्, लङ् लकाराणां प्रत्ययाः
- तिङ्भिन्नाः प्रत्ययाः कतः
  - सार्वधातुकम् — शत, शानच्, चानश्, शानन्, खश्, श, एश्, शध्यै, शध्यैन् इमे सर्वे शित्प्रत्यया अपितः
  - आर्धधातुकम् — शिद्भिन्नाः
    - कितः, ङितः — क्त, क्तवतु, क्त्वा यङ्, चङ्, अङ् इत्यादयः
    - कित्-ङित्-भिन्नाः — तुमुन्, तव्य, तच् स्य, सिच्, इत्यादयः

---

## १०. अस्-धातु-कृते द्वौ विशेषप्रत्ययौ

**अस्तिसिचोऽपृक्ते (७.३.९६)** - अस्धातोः परस्य अपृक्तप्रत्ययस्य ईडागमो भवति।

लङ् - त्--ईत् - आसीत्। स्-ईः - आसीः। अन्ये प्रत्यया न परिवर्तन्ते।

## ११. अस्-धातु-कृते द्वौ विशेषप्रत्ययौ

**अदः सर्वेषाम् (७.३.१००)** - अद उत्तरस्य अपृक्तस्य अडागमो भवति। लङ् - त्-अस्य स्थाने-अत् - आदत्। स्-अस्य स्थाने-अः - आदः। अन्ये प्रत्यया न परिवर्तन्ते।

## १२. आकारान्त-धातूनां कृते एकः प्रत्ययो विशेषेण

**लङः शाकटायनस्यैव** (३.४.१११) - आकारान्तधातोः परस्य अन्प्रत्ययस्य स्थाने वा उः प्रत्ययो भवति। अया - अयुः, अयान्। अवा - अवुः, अवान्। अन्ये प्रत्यया न परिवर्तन्ते।

## १३. द्विष्-धातु-कृते एकः प्रत्ययो विशेषेण

**द्विषश्च** (३.४.११२) - द्विष उत्तरस्य लङो झेर्जुस् वा स्यात्। अद्विषुः, अद्विषन्।

## १४. १५. ईड्-ईश्-धातु-कृते द्वौ प्रत्ययौ विशेषेण -

**ईडजनोर्ध्वे च**(७.२.७८) ईश्ईड्धातुभ्यां परयोः से, ध्वे प्रत्यययोः ईडागमो भवति। तेन से इत्यस्य स्थाने इषे भवति - ईशिषे, ईडिषे। ध्वे इत्यस्य स्थाने इध्वे भवति - ईशिध्वे, ईडिध्वे।

**इत्थञ्च लट्, लोट्, लङ्, विधिलिङ्, इत्येतेषां चतुर्णा लकाराणां ७४ प्रत्ययाः, अथ च शतृ, शानच्, चानश्, शानन्, खश्, श, एश्, शध्यै, शध्यैन्, एते ९ कृत्प्रत्ययाः। शप्, श्यन्, श, श्नु श्नम्, श्ना, इत्येते ६ विकरणप्रत्ययाः 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञकाः सन्ति।**

## सार्वधातुकप्रत्ययानां चत्वारो विभागाः

**सार्वधातुकप्रत्यया द्विविधा।** पितः, अपितश्च। उपरिलिखितेषु प्रत्ययेषु ये प्रत्ययाः स्थूलाक्षरैः तिर्यग् लिखिताः सन्ति, ते पितः। तत्र लट्लकारस्य ***ति, सि ,मि,*** लङ्लकारस्य ***त्, स्, अम्,*** लोट्लकारस्य ***तु, आनि, आव, आम, ऐ, आवहै, आमहै*** एते १३ प्रत्ययाः, पितः, विकरणेषु च ***शप्*** इति पित्। आहत्य १४ सार्वधातुकप्रत्ययाः पितः सन्ति। पित्प्रत्ययाः पुनर्द्विविधाः। अजादयो, हलादयश्च। ***ति, सि, मि, तु, त्, स्,*** इत्येते षड् हलादयः पितः। ***आनि, आव, आम, ऐ, आवहै, आमहै, अम्,*** इत्येते सप्त अजादयः पितः। एकः ***शप्*** च। पिद्भिन्नाः सर्वे सार्वधातुकप्रत्यया अपितः सन्ति। अपित्प्रत्ययाः अस्थूलाक्षरैः समेन लिखिताः सन्ति। इत्थञ्च सार्वधातुकप्रत्ययाश्चतुर्विधाः सन्ति-

| | |
|---|---|
| **१. हलादयः पितः - ६** | **२. अजादयः पितः ७+शप्** |
| **३. हलादयः अपितः - ३८** | **४. अजादयः अपितः २३** |

**सार्वधातुकमपित् (१.२.४)** - अत्र ये अपित्सार्वधातुकप्रत्ययाः सन्ति, ते ङिद्वद् भवन्ति।

एतेन सर्वान् अपित्सार्वधातुकप्रत्ययान् ङिद्वद् मत्वैव शास्त्रे कार्यं भवति। अतः ङित्सु प्रत्ययेषु परतो यत्कार्यमुच्यते, तत्सर्वं कार्यम् अपित्सु सार्वधातुकेषु प्रत्ययेष्वपि परतो भवति, इति सम्यग् मनसि निधायैव पाणिनीयव्याकरणे प्रवेष्टव्यम्। सर्वे सार्वधातुककृत्प्रत्यया अपितः सन्ति, शब्भिन्नाः सर्वे विकरणा अपि अपितः सन्ति। एतेषां सम्यग्विज्ञानं यस्य भवति, स एव प्रक्रियापण्डितो भवति। अत आदावेषां सम्यगभ्यासो विधेयः। अत्रेदं ध्येयम् - पित् सार्वधातुकम् = अकित् आर्धधातुकम्। अपित् सार्वधातुकम् = कित् ङित् आर्धधातुकम्।

## १६. लेट्लकारस्य सार्वधातुकप्रत्ययाः

लेट्लकारो द्विविधः। सिबभावे सार्वधातुकसंज्ञकः। सिप्प्रत्यये आर्धधातुकसंज्ञकः। अस्मिन् सार्वधातुकखण्डे लिट्लकारस्य सार्वधातुकप्रत्यय उच्यन्ते-

**लेटोऽडाटौ (३.४.९४) इति अडागमे लेट्लकारस्य विशेषप्रत्ययाः**

| | **परस्मैपदम्** | | | **आत्मनेपदम्** | | |
|---|---|---|---|---|---|---|
| | एकवचन | द्विवचन | बहुवचन | एकवचन | द्विवचन | बहुवचन |
| *प्र.* पु. | अति | अतः | अन्ति | अते | ऐते | अन्ते |
| | अत् | - | अन् | अतै | - | अन्तै |
| | अद् | | | | | |

| | | | | | | |
|---|---|---|---|---|---|---|
| म. पु. | असि | अथः | अथ | असे | ऐथे | अध्वे |
| | अः | - | - | असै | - | अध्वै |
| उ. पु. | अमि | अवः | अमः | ए | अवहे | अमहे |
| | अम् | अव | अम | ऐ | अवहै | अमहै |

**लेटोऽडाटौ (३.४.९४) इति आडागमे लेट्लकारस्य सार्वधातुकप्रत्ययाः**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | आति | आतः | आन्ति | आते | ऐते | आन्ते |
| | आत् | - | आन् | आतै | - | आन्तै |
| | आद् | - | | | | |
| म. पु. | आसि | आथः | आथ | आसे | ऐथे | आध्वे |
| | आः | - | - | आसै | - | आध्वै |
| उ. पु. | आमि | आवः | आमः | ऐ | आवहे | आमहे |
| | आम् | आव | आम | - | आवहै | आमहै |

**आर्धधातुकं शेषः - सार्वधातुकभिन्नाः प्रत्यया आर्धधातुकसंज्ञा भवन्ति।**

अतो लिट्, लुट् लृट्, आशीर्लिङ्, लुङ्, लृङ् लकाराणां प्रत्ययाः, शिद्भिन्नाश्च प्रत्यया, आर्धधातुकसंज्ञा भवन्ति

## २. द्वितीयमुपाङ्गम्-विकरणाः

यदा धातुभ्यो लट्, लोट्, लङ्, विधिलिङ्, एते सार्वधातुकलकाराः कर्तरि विधीयन्ते, अथ च शतृ, शानच्, चानश्, शानन्, खश्, श, एश्, शध्यै, शध्यैन्, एते नव सार्वधातुकप्रत्यया विधीयन्ते, तदा धातुप्रत्यययोर्मध्ये एकः अन्यः प्रत्ययः पतति, स एव विकरण इत्युच्यते। यथा -

भू + ति - भू + शप् + ति = भवति। दिव् + ति - दिव् + श्यन् + ति = दीव्यति। तुद् + ति - तुद् + श + ति = तुदति। पा + शतृ - पा + शप् + शतृ = पिबत्।

**प्रकृतिप्रत्यययोर्मध्ये यत्पतितं तद् विकरणम्।** इमे विकरणास्तृतीयाध्याये प्रथमे पादे ३.१.६८ इत्यतः ३.१.९० इत्यन्तं सन्ति।

इत्थञ्च लट्, लोट्, लङ्, विधिलिङ्, एतेषां चतुर्णां लकाराणामथ च शतृशानजादि-नव-कृत्-प्रत्ययानामेको वर्गो भवति, सार्वधातुकसंज्ञकः। तत्र सार्वधातुकनिमित्तका विकरणप्रत्यया उच्यन्ते -

**दिवादिभ्यः श्यन्** - दिवादिगणपठितेभ्यो धातुभ्यः कर्तरि सार्वधातुके श्यन् प्रत्ययो भवति। दीव्यति। सीव्यति।

**स्वादिभ्यः श्नुः**- स्वादिगणपठितेभ्यो धातुभ्यः कर्तरि सार्वधातुके श्नुः प्रत्ययो भवति। सुनोति। सिनोति।

**तुदादिभ्यः शः** - तुदादिगणपठितेभ्यो धातुभ्यः कर्तरि सार्वधातुके शः प्रत्ययो भवति। तुदति। नुदति।

**रुधादिभ्यः श्नम्** -रुधादिगणपठितेभ्यो धातुभ्यः कर्तरि सार्वधातुके श्नम् प्रत्ययो भवति। रुणद्धि। भिनत्ति।

**तनादिकृञ्भ्यः उः** - तनादेः कृञश्च धातोः कर्तरि सार्वधातुके उ प्रत्ययः भवति। शपोऽपवादः। तनोति। करोति।

**क्र्यादिभ्यः श्ना** -क्र्यादिगणपठितेभ्यो धातुभ्यः कर्तरि सार्वधातुके श्ना प्रत्ययो भवति। क्रीणाति। प्रीणाति।

**कर्तरि शप्** -षण्णां गणानां कृते विकरणा उक्ताः भ्वादि-चुरादि-अदादि-जुहोत्यादिगणानां कृते विकरणं नोक्तं, तत्र कर्तरि शप् इति शप् भवति। सनाद्यन्तधातूनां क ृतेऽपि विकरणं नोक्तं, तत्रापि कर्तरि शप् इति शप् भवति। भवति। पचति। जिगमिषति। पुत्रीयति।

**अत्र शप्, श्यन्, श, श्नु श्नम्, श्ना, इत्येतेषु शकारस्य इत्संज्ञा भवति, अत एतेषां षण्णां विकरणानां शित्त्वात् तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञा भवति।**

**विशेषविकरणाः** -

**अक्षोऽन्यतरस्याम्** (३.१.७६) - अक्षू व्याप्तौ, अस्माद् शप्, श्नुः एतौ विकरणौ वा भवतः। अक्षति, अक्ष्णोति।

**तनूकरणे तक्षः** (३.१.७६) -तक्षू, त्वक्षू तनूकरणे, अस्मात् तनूकरणेऽर्थे वर्तमानाद् शप्, श्नुः एतौ विकरणौ वा भवतः। तक्षति, तक्ष्णोति।

**वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः** (३.१.७०) - भ्राश,भ्लाश,भ्रमु,क्रमु,क्लमु,त्रसि,त्रुटि,लष्, एभ्यः श्यन्वा भवति कर्त्रर्थे सार्वधातुके परे। भ्राश्यते,भ्राशते। भ्लाश्यते,भ्लाशते। भ्राम्यति,भ्रमति। क्राम्यति,क्रमति। क्लाम्यति,क्लामति। त्रस्यति,त्रसति। त्रुट्यति,त्रुटति।

**यसोऽनुपसर्गात्** (३.१.७१) - अनुपसर्गात् यसः श्यन् वा कर्तरि सार्वधातुके। यस्यति,यसति।

**संयसश्च** (३.१.७२) - सम्पूर्वात् यसः श्यन् वा भवति। संयस्यति संयसति।

**स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च** (३.१.८२) -स्तन्भु,स्तुन्भु,स्कन्भु,स्कुन्भु,स्कुञ्,एभ्यः श्नु श्ना च सार्वधातुके। स्तभ्नोति स्तभ्नाति। स्तुभ्नोति स्तुभ्नाति। स्कभ्नोति स्कभ्नाति। स्कुभ्नोति। स्कुभ्नाति। स्कुनाति स्कनोति।

**हल: श्न: शानज्झौ (३.१.८३)** - हल उत्तरस्य श्नाप्रत्ययस्य शानजादेशो भवति हौ परत:। यथा - बध् + श्ना + हि / बध् + शानच् + हि = बधान।

यदा धातुभ्य आर्धधातुकलकारा, अथ च शतृशानजादिभिन्ना: कृत्-प्रत्यया विधीयन्ते, तदा मध्ये न भवन्ति सार्वधातुकप्रत्ययनिमित्तका: शबादि-विकरणा:। **अयमेव वर्तते विशेष उभयोर्मध्ये।**

---

# ३. तृतीयमुपाङ्गम्-धात्वादेश:

**धात्वादेशा:** - प्रत्यये परतो धातो: स्थाने विधीयमाना आदेशा धात्वादेशा इत्युच्यन्ते। सार्वधातुकेषु प्रत्ययेषु इमे धात्वादेशा: ७.३.७१-८१ इति यावदुक्ता:। ते चात्रोच्यन्ते -

## सार्वधातुके प्रत्यये परतो धात्वादेशा:

**दंशसञ्जस्वञ्जां शपि (६.४.२५)** - दंश्, सञ्ज्, स्वञ्ज्, एतेषां कारस्य लोपो भवति शपि परत:। दंश् + शप् + ति = दशति। सञ्ज् + शप् + ति = सजति। स्वञ्ज् +शप् + ते = स्वजते।

**रञ्जेश्च (६.४.२६)** - रञ्जे: नकारस्य लोपो भवति शपि परत:। रञ्ज् + शप् + ति = रजति।

**ओत: श्यनि (७.३.७१)** - ओत: लोपो भवति श्यनि।

शो+श्यन्+ति = श्यति। श्यत: श्यन्ति।

षो+श्यन्+ति = स्यति। स्यत: स्यन्ति।

छो+श्यन्+ति = छ्यति। छ्यत:, छ्यन्ति।

दो+श्यन्+ति = द्यति। द्यत:, द्यन्ति।

**शमामष्टानां दीर्घ: श्यनि (७.३.७४)** - शमादीनामष्टानां दीर्घो भवति श्यनि।

शम्+श्यन्+ति=शाम्यति।
तम्+श्यन्+ति=ताम्यति।
दम्+श्यन्+ति=दाम्यति।
क्लम्+श्यन्+ति=क्लाम्यति।
श्रम्+श्यन्+ति=श्राम्यति।
भ्रम्+श्यन्+ति=भ्राम्यति।
क्षम्+श्यन्+ति=क्षाम्यति।
मद्+श्यन्+ति=माद्यति।

**ष्ठिवु-क्लमु-चमां-शिति (७.३.७५)** - एषामचो दीर्घो भवति शिति।

ष्ठिव्+शप्+ति=ष्ठीवति। क्लम्+शप्+ति=क्लामति। आ+चम्+शप्+ति=आचामति।

**क्रम: परस्मैपदेषु (७.३.७६)** - क्रमधातो: दीर्घो भवति परस्मैपदे परे शिति।

क्रम्+श्यन्+ति=क्राम्यति क्रम्+शप्+ति=क्रामति।

**इषु-गमि-यमां छ: (७.३.७७)** - एषां छो भवति शिति।

इष्+श+ति=इच्छति। गम्+शप्+ति=गच्छति। यम्+श+ति=यच्छति।

**पा-घ्रा-ध्मा-स्था-म्ना-दाण्दृश्यर्ति-सर्ति-शद-सदां पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-धौ-शीय-सीदा: (७.३.७८)** - पादीनां पिबादय: आदेशा भवन्ति शिति प्रत्यये परे।

पा+शप्+ति=पिबति। घ्रा+शप्+ति=जिघ्रति। ध्मा+शप्+ति=धमति।
स्था+शप्+ति=तिष्ठति। म्ना+शप्+ति=मनति। दा+शप्+ति=यच्छति।
दृश्+शप्+ति=पश्यति। ऋ+शप्+ति=ऋच्छति। सृ+शप्+ति=धावति।
शद्+शप्+ते=शीयते। सद्+शप्+ति=सीदति।

**ज्ञाजनोर्जा (७.३.७९)** - अनयोजदिशो भवति शिति। ज्ञा + श्ना + ति = जानाति। जन् + श्यन् + ते = जायते।

**प्वादीनां ह्रस्व: (७.३.८०)** - प्वादीनां ह्रस्व: भवति शिति। पू+श्ना+ति=पुनाति। प्वादय द्वाविंशति: सन्ति।

पू+श्ना+ति=पुनाति। लू+श्ना+ति=लुनाति। धू+श्ना+ति=धुनाति।
ज्या+श्ना+ति=जिनाति। री+श्ना+ति=रिणाति। ली+श्ना+ति=लिनाति।
व्ली+श्ना+ति=व्लिनाति। प्ली+श्ना+ति=प्लिनाति। स्तॄ+श्ना+ति=स्तृणाति।
कॄ+श्ना+ति=कृणाति। वॄ+श्ना+ति=वृणाति। शॄ+श्ना+ति=शृणाति।
पॄ+श्ना+ति=पृणाति। वॄ+श्ना+ति=वृणाति। भॄ+श्ना+ति=भृणाति।
मॄ+श्ना+ति=मृणाति। दॄ+श्ना+ति=दृणाति। जॄ+श्ना+ति=जृणाति।
नॄ+श्ना+ति=नृणाति। कॄ+श्ना+ति=कृणाति। ॠ+श्ना+ति=ऋणाति।
गॄ+श्ना+ति=गृणाति।

**मीनातेर्निगमे (७.३.८१)** - मीनातेरङ्गस्य ह्रस्वो भवति शिति प्रत्यये परतो, निगमविषये।

प्रमिणन्ति व्रतानि।

**शे मुचादीनाम् (७.१.५९)** - शे परतो मुचादीनां धातूनां नुमागमो भवति।

पू+श्ना+ति=पुनाति। लू+श्ना+ति=लुनाति। धू+श्ना+ति=धुनाति।
मुच्+श+ति=मुञ्चति। लुप्+श+ति=लुम्पति। लिप्+श+ति=लिम्पति।
विद्+श+ति=विन्दति। सिच्+श+ति=सिञ्चति। खिद्+श+ति=खिन्दति।

कृत्+श+ति=कृन्तति।पिश्+श+ति=पिंशति।

**श्रुवः शृ च** – श्रुधातोः स्थाने शृ इत्ययमादेशो भवति, शिति। श्रु+श्नु+ति=शृणोति।

**ऊदुपधाया गोहः** (६.४.८९) – गुह्धातोरुपधाया ऊदादेशो भवति, अजादौ सार्वधातुके, आर्धधातुके च प्रत्यये परतः। गुह्+शप्+ति=गूहति। गुह्+णिच्+शप्+ति=गूहयति।

**कृपो रो लः** (८.२.१८) – कृपेर्धातो रेफस्य लकारादेशो भवति। कृप् + शप् + ते - क्लृप् + शप् + ते - 'पुगन्तलघूपधस्य च' इति गुणे - कल्प् + अ - कल्प = कल्पते। अयमादेशः सार्वधातुके, आर्धधातुके चोभयत्र भवति।

**रधिजभोरचि** (७.१.६१) – रध्, जभ् एतयोर्नुमागमो भवति अजादौ सार्वधातुके, आर्धधातुके च प्रत्यये परतः। जभ् + शप् + ते = जम्भते। रध् + णिच् = रन्धयति।

---

## ४. चतुर्थमुपाङ्गम्-सार्वधातुकेऽतिदेशः

**अतिदेशः** – अतस्मिंस्तद्धर्मारोपोऽतिदेशो भवति। यो धर्मो यत्र न भवति, स धर्मः क्वचित् तत्रारोप्यते। यथा - क्त्वाप्रत्ययः किद् अस्ति, किन्तु इडागमे सति स क्त्वाप्रत्ययः 'न क्त्वा सेट्' इति सूत्रेण अकिद् भवति। तेन देवित्वा इत्यत्र गुणो भवति। सिच्प्रत्ययः अकिद् अस्ति, किन्तु 'लिङ्सिचावात्मनेपदेषु' इति सूत्रेण किद् भवति। तेन असिक्त इत्यत्र गुणो न भवति। अतः अङ्गकार्यात् प्राग् अतिदेशस्य ज्ञानमावश्यकं भवति। अष्टाध्याय्यां १.२.१ इत्यत आरभ्य १.२.२६ इत्यन्तमतिदेशप्रकरणं वर्तते। तच्चात्र व्याख्यायते। एतदधीत्यैवाङ्गकार्यस्य निर्णयो भवेदिति।

**सार्वधातुकमपित्** (१.२.४) – ये अपित्सार्वधातुकप्रत्ययाः सन्ति, ते ङिदवद् भवन्ति। लट्लकारस्य - ति, सि, मि, लङ्लकारस्य त्, स् अम्, लोट्लकारस्य - तु, आनि, आव, आम, ऐ, आवहै, आमहै अथ च विकरणेषु शप्, इत्याहत्य १४ प्रत्ययाः पितः सन्ति, अन्ये सर्वे अपितः।

अपिति प्रत्यये परतो 'क्ङिति च' इति गुणनिषधो भवति। चिनु+तः = चिनुतः। चिनु+वः = चिनुवः। चिनु+मः = चिनुमः। चिनु+यात् = चिनुयात्। चिनु+ते = चिनुते।

---

## ५. पञ्चममुपाङ्गम् द्वित्वाभ्यासकार्यम्

यथाकालं वक्ष्यते।

❀❀❀